X

CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S.D.P.B.
Coll. No. 31

Title PRASADADIDHVAJAPRATISTHA
PADDHATI.

From:DHARMATATTVANIRNAYA

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 31 Subject: Dharmasastra

Title: Prasadadi dhvajapratisthapaddhatih

Author: Sankara Bhatta. Scribe: —

Date of the work: — Date of the Ms.: —

Place of the work: Place of the Ms.: —

Size: 9.5" by 4.9".
8.4" by 4.5" of lost line. Extent: 10 foll. 1st missing.

Language: Sanskrit. Script: Devanagari.

Remarks: Foll. 1st is missing.

ध्यायां वसमेत्वं चराचरे ॥ योगशय्याप्रसुप्तस्य वासुदेवस्य शासने ॥ त्वं प्रतिष्ठा
स्थिवेदेवि मुनियोगिसमुत्थिते ॥ पितृदेवमनुष्याणां सयक्षोरगराक्षसां ॥ पशुप
क्षिमृगाणां च योगमाया विवर्द्धिनी ॥ वससे सर्वसत्वेषु मातेव हितकारिणी ॥ रहि
साविनिर्मुक्तिं च सूक्ष्मांस्थानगोचरे ॥ छिन्ननासापुटे देवि कंठे चोत्कंठितावि
श ॥ प्रतिमावयमांसवर्म्माच्च वद्देवा सुंदरी ॥ इदमर्घ्यं मयादत्तं पूजेयं प्रतिगृह्यतां ॥ इति
मंत्रैर्निद्रामावाह्य संपूज्य मंडले देवं पूजयेत् ॥ विष्णुं तु द्वादशारे च चक्रे ॥ ततः परिवारदेव
तानां पंचावर्णानि चैविक्रम्य मुक्तानि पूजयेत् ॥ ततो दिव्यवाससा देवमाछाद्य पुरुष
सूक्तेन स्तुत्वा पुष्पांजलिं दत्वा गंधादिभिर्मंडपं वेदिं चावकीर्य । देवस्याग्रे चतुरस्रमं
डले कोणेषु स्वस्तिकलांछितान् कृत्वा ॥ ब्रह्मविष्णु ईशान प्रतिदिशं लोकपालांस्तदंत
राले ऽष्टौ वसव । एकादश रुद्र द्वादशादित्य । विश्वेदेवा । साध्या । नासत्य । मरुद्गण । गंध

वा। स्मरसः। पिंगगण। पुष्पदंतादीनि। विघ्नेश। स्कंद। दुर्गाक्षेत्रपाला। न्यासावकाशं[illegible]
वास्तुतन्त्रनामभिरर्चयित्वा। प्रतिष्ठाप्य। देवं पार्श्वदेशेन मह इति आचार्यकार्यं॥ अथाचार्यः
। कुंडं स्थंडिलं वागत्य देवस्यात्र कलासंनिधिसिद्ध्यर्थं यक्ष्य इति संकल्प्यान्वाधानं कु
र्यात्। तत्राग्निसोमावाज्येनेत्यंतमुक्त्वात्र प्रधानं शिवं त्र्यंबकमंत्रेण छोत्तरसहस्र
मष्टोत्तरशतं वा प्रतिद्रव्यं पलाशोदुंबराश्वत्थापामार्गशमीसमिद्भिराज्येन तिलैश्च प
रिवारदेवतांश्च गणपतिं दुर्गां विष्ण्वाद्याश्च अष्टविंशतिसंख्यया पूर्वद्रव्यैरेव नंदिनं वा
हनं चोक्तद्रव्यैरेवाष्टसंख्यया यक्ष्ये शेषेण स्विष्टकृतमित्यादि। ततो होमं समर्त्विग्भिः
कुर्यात्॥ तत्राग्ने होमे प्रत्याहुतिशेषं कुंभे समिपस्थापितशांतिकलशे [illegible] क्षिपेत प्र
तिद्रव्यं कृत्वा॥ देवं शिरसि शिरसि पादयोश्च पृथक्समष्टिं स्विष्टकृदादिकृत्वा द्वादश
कृत्वश्चिरहृत्वाज्यं नारिकेलादिफलं च पटकूलादिवेष्टितं महानिंदिव इति पूर्णा

हुतिं कृत्वा देवदक्षिणकरे होमं निवेदयेत्। पूर्वद्वारादिजपकास्तत्कार्यकारिणोऽन्ये स्विन
एवं वा आहोमांतं आनो भद्राः। स्वस्तिन इंद्रो वृद्धश्रवाः॥ शन्न इंद्राग्नी शन्नो वात॥ इति या
नुषद्दांतिं च पठेयुः। तथा पुरुषसूक्तं रुद्रसूक्तानि गायत्रीं आस्त्रं पावपानं रातरुद्रियं
यानुषंसंत्रवेन्येष्टमामनालं चावर्तयेयुः। तत आचार्यो विचित्रं रुधिरान्नेन रुद्रबलिं दद्यान्
मंत्रः॥ ॐ नमो रुद्राय सर्वभूताधिपतये दीप्तमूलधराय उमासहिताय विश्वाधिप
तये रुद्राय देवे नमो नमः॥ शिवागर्हितं कर्माक्षेमोस्तु स्वाहेति। भूतबलिं स्व[illegible]पर्णेन
तोगर्भगृहे देव्याय कर्मणो शुद्ध ध्वमितिगंधोदकपूरितेन कलशेन प्रासादं प्रोक्ष्य फला
दिभिः पूजयित्वा सर्वदेवमयं वास्तुपुरुषं सर्वाधारं तस्याधस्ताच्चिंत्य संपूज्य प्रासाद
मधिवासयेत्॥ अत्र त्रिविक्रमेण विस्तरतः प्रासादाधिवासनमुक्तं। ॐ ह्रीं सर्वदेवमया
चिंत्य सर्वरत्नोज्ज्वलाकृते॥ यावच्चंद्रश्च सूर्यश्च तावदत्र स्थिरो भवेति। अपत्राधिवा

सनोगतयाचार्यायधेनुंदक्षिणांमृत्विग्भ्यश्चयथाशक्तिब्राह्मणेभ्यश्चस्तोत्रजनंदद्यात॥रात्रौ
जागरणंगीतवाद्यादिनाकुर्यात्दिनद्वयधिष्ण्यंवासनं॥अथश्वोभूतेवारिणासर्वतःप्रोक्षणशालां
तरितामधस्थलंनौक्ष्मविरिनांतरितेनमकल्पितांप्रणवेनाभिमंत्र्यतदुपरिब्रह्मशिलात्वेन
परिकल्पितां॥ॐनमोव्यापिनीस्थिरेऽचलेध्रुवेह्रंश्रींलंस्वाहेतिमंत्रेणगंधादिनासंपूज्य
प्रार्थयेत॥त्वमेवपरमाशक्तिस्त्वमेवासनकारिका॥शिलामयात्वयादेवीस्थातव्यमिह
सर्वदेति॥तदुपरिपीठिकांखंपूर्वपश्चिमाननेप्रासादेसौम्यप्रणालिकांदक्षिणोत्तराना
नेपूर्वप्रणालिकां॥अथवसत्त्वेननिधायाभिषिच्यमहामृत्युमानरंसुव्रतानामृतस्यपत्नी
मवसेहुवेम॥तुविक्षत्रामजरंतामुरुचीसुशर्माणमदितिंसुप्रणीतं॥गौरीर्मिमायजातवे
दस॥इतिदेव्यायामिंद्रगौरींविन्यसेत॥अथतेसकुंभिवेतिलपूर्णमावाह्यआदिनिधी
रितिस्तुत्वाॐह्रींनमइतिह्रींकमलमंत्रेणषोडशोपचारैःसंपूज्यानेनैवमंत्रेणपूर्णाहुतिंहु

त्वाप्रणीतानिनयनादिकृत्वातिवंदनाग्निपूजनसंस्थाजपादि॥चत्वारिपंडीकास्थानेपंचरत्ना
निन्यसेत॥पूर्वादिमध्यांतंसव्यक्रमेणतद्यथा॥बाह्यपरिधौयवव्रीहिनिष्पावप्रियंगुतिल
माषनीवाराणिसिद्धार्थान्॥ततोवज्रमौक्तिकवैडूर्यशंखस्फटिकपुष्परागचंद्रकां
तेंद्रनीलपद्मरागान्॥मनःशिलाहरितालजननशोमांजनकाशसस्वर्णसौराष्ट्रगोरो
चनगैरिकपारदान्॥हिरण्यरजतताम्रायसपित्तलत्रपुसीसकांसारकूटनासा
लोहानि॥एतन्नवकचतुष्टयस्याभ्यंतरवमास्तप्रोक्तनारदोक्तशालिमुक्तिहरितालसुव
र्णनियोज्यानि॥रत्नादि॥बाह्यपरिधितोऽभ्यंतरतोऽभ्यंतरितः॥प्रागादीशानांतंसंन्यसे
त्तद्यथा॥वज्र।मौक्तिक।वैडूर्य।शंख।स्फटिक।पुष्परागेंद्रनीलमहानीलानः।ताल
कः।मनःशिलाभ्रकनीलांजनसौराष्ट्रीकासीसस्वर्णमाक्षिकगैरिकान्॥गोधूमयवतिल
मुद्गनिवारश्यामाकसर्षपव्रीहीन्॥हिरण्यरजतताम्रायःत्रपुसीसकघोषरीतिकाः

श्वेतचंदनरक्तचंदननागचंदनागरुकाऊनोशीरवेष्टवासहदेवालक्ष्मणस्मर्णाचेति। अत्र र
त्नानामसंज्ञवेवज्रं॥ धातूनामसंज्ञवेहरितालं॥ लोहानामसंज्ञवेसुवर्णं॥ बीजानामसंज्ञवे
यवान्॥ ओषधीनामसंज्ञवेसहदेवामिति॥ न्यस्तमो लोकपालमंत्रैरभिमंत्रणं॥ सुवर्णं
गरुडं विष्णोः शंखोस्तु रूप्यहेमजं शंखमेन्यसेत्॥ मधुपायसेनस्थानं संलिप्य शुक्लवस्त्रेणा
च्छादयेत्॥ ततोदेवंप्राप्य घंटादिनादेनप्रार्थयेत्॥ प्रबुध्यस्वमहानागदेवदेवजगत्पते॥
मेघश्यामगदापाणे प्रबुद्धकमलेक्षण॥ प्रबुध्यस्वध्यानंदवासुदेवनमोस्तुतेइति॥ ततो
पक्षारक्षणान्प्रतितिलतंडुलयवसिद्धार्थकपुष्पाणिमंत्रकृत्वा। देवायार्घ्यं दत्वा॥ ॐ विष्णु
लग्नस्यतथ्यइन्दुस्थाप्यरथमारोप्यपुरतः आचार्यः पृष्ठतो यजमानः सपुत्रकलत्रइसेवं
स्वस्तिनइतिसुमंगलपाठेनचानीयप्रासादद्वारेरथादवतार्यआच्छादनेनलिंगगर्भगृहंप्र
वेश्यअर्घमधुपर्काभ्यामभ्यर्चयेत्॥ अथवारत्वादिन्यासः। तत्रश्वभ्रेसवर्णानांकोपं

तरितांकृत्वा द्वारान्तिमुखंदेवंप्रणवेनकृतांगन्यासः॥ सुलग्नेप्रतिष्ठपरमेश्वरेतिन्नालाका
मपसार्यप्रतिष्ठापयेत्॥ अथप्राणप्रतिष्ठा॥ प्राणप्रतिष्ठामंत्रस्य ब्रह्मविष्णुरुद्राऋषयः
यः॥ ऋग्यजुःसामानि छंदांसि॥ क्रियामयवपुः प्राणाख्यादेवता॥ प्राणप्रतिष्ठायांवि
नियोगः॥ ततोन्तमार्द्धिः प्रकरणोक्तंअंगन्यासंकृत्वा। ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हं
सः देवस्यप्राणाइहप्राणाः॥ ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हं सः देवस्यजीवइहज्ञा
वस्थितः॥ ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हंसः देवस्यसर्वेंद्रियाणि। ॐ आं ह्रीं क्रों यं र
लं वं शं षं सं हंसः देवस्यवाङ्मनश्चक्षुःश्रोत्रघ्राणानिइहागत्यस्वस्तयेसुखेनसुचिरंतिष्ठंतु
स्वाहा॥ इतिप्राणप्रतिष्ठामंत्रेणसजीवंध्यायेत्॥ ततःप्रधानपुरुषोयावत्तयाव
चंद्रदिवाकरौ॥ तावत्त्वमनयाज्ञयायुक्तोत्रैवस्थिरोभवेत्युक्त्वाभवाघोरितिस
चंजलापिंडिकालिंगांतरस्थानसकादिभिर्निविडंपूरयित्वापुनर्नचालयेत्। ततोविष्णोः अ

तसीपुष्पसंकाशं शंखचक्रगदाधरं ॥ संस्थापयामि देवेशं देवोत्तमजनार्दनं ॥ रुद्रे तु । ॐ सं
चंद्रशबाहुं च चं शार्द्धकृतशेखरं सगणेशा हृषकंनस्थं च स्थापयामि त्रिलोचनं इति जि
पित्वा देवस्य हृदयं स्पृष्ट्वा पुरुषसूक्तं विष्णो रुद्रस्य रौद्रं जपित्वा प्रणवेन देवेशं गंन्धा
संकल्प्य कोशेसि व्याहृतिकां गायत्री प्राणसूक्तं च जपित्वा पुरुषसूक्तेनोपतिष्ठेत ॥ यज
मानस्तु स्वागतं देवदेवेश मुद्भाग्यात्त्वमिहागतः ॥ प्राकृतं त्वमदृष्ट्वा मां बालवत्परिपाल
य ॥ धर्मार्थकाम सिद्ध्यर्थं स्थिरो भव शुभानन ॥ सानिध्यं तु सदा देवस्वार्चायां परि
पालय ॥ यावच्चंद्रावनी सूर्यास्तिष्ठंत्यप्रतिघातिनः ॥ तावत्त्वयात्र देवेश स्थेयं भ या
क्तानुकंपया ॥ भगवन् देवदेवेश त्वं पिता सर्वदेहिनां ॥ येन रूपेण भगवन् त्वया व्याप्तं
चराचरं ॥ तेन रूपेण देवेश स्वार्चायां सन्निधो भवेति ॥ सकलत्रः शरणं प्रपद्य पुष्पां
जलिं दद्यात ॥ आचार्यस्त्वर्घ्यादि दत्त्वा शांतिकलशोदकेन पंचामृतैश्चाभिषिच्य पु

णकुशास्त्रोदकेन स्नापयित्वा पुनस्तल्लिंगमंत्रेण संपूज्य पादनाभिशिरःसु । देवस्य हृ
दृ हृदये धीति त्रिर्जपित्वा परिवारदेवतानामपि प्राणप्रतिष्ठां कुर्यात ॥ एवं देवं प्रतिष्ठा
प्य प्रार्थयेत ॥ लोकानुग्रहहेत्वर्थं स्थिरो भव सुखासने ॥ सानिध्यं हि महादेव प्रत्यहं
परिवर्त्तय ॥ मान्यत्वं प्रजापतिरास्मिंस्त्वमानः समृध्यतां ॥ संपालयतराष्ट्रं [redacted]
सर्वोपद्रववर्जितं ॥ क्षेमेण वृद्धिमतुलां सुखमत्यय मश्नुते ॥ ततो बहिर्निःसृत्य द्वार
पालादीन् स्वस्वनाममंत्रैः स्थापयेत । विष्वक्सेनं चंडप्रचंडादीन् शिवस्य नंदि म । हाकाल
गणेशं भृंगि चंडी उमा । वृषा स्कंदादीन ॥ सूर्यस्येदं तु स्थापनादीन । पिंगलादीन । ततः
प्रासादं पुरुषाकारं ध्यात्वा स्थापयेत ॥ प्रासादं संप्रवक्ष्यामि रूपं ध्यानं यथा भवेत ।
पादौ पादशिलास्तस्य जंघापायाप उच्यते ॥ गर्भश्चैवोदरं ज्ञेयं कटिश्च कटिमेखला
। स्तंभास्तु बाहवो ज्ञेया घंटा जिह्वा प्रकीर्त्तिता ॥ दीपः प्राणोस्य विज्ञेय स्त्वपानो जलं

निर्गमः॥ ब्रह्मस्थानं तु यत्तस्य तन्नाभिस्तु प्रकीर्तिता॥ हृत्स्थं पिंडिका ज्ञेया प्रतिमा जीव उ
च्यते॥ पादचारस्त्वहंकारो ज्योतिस्तच्चक्षुरुच्यते॥ तदूर्ध्वं प्रकृतिस्तस्य प्रतिमा पुरुषः स्मृतः
। तलं कुंभस्तु पाद्वारं तस्य प्रजननं स्मृतं॥ शुकनासा च वेन्नासा गवाक्षः कर्ण उच्यते॥
कपोतपालिः स्कंधोस्य ग्रीवा चामलसारकः॥ कलशस्तु शिरो ज्ञेयं मज्जा क्लिमरसंहितं॥
महेश्वेवसुधां बिघात्मलेपो मांसमुच्यते॥ अस्थानि तु शिलास्तस्य स्नायुः कीलादयः
स्मृताः॥ चक्षुषि शिखरास्तस्य ध्वजाः केशाः प्रकीर्तिताः॥ एवं पुरुषरूपं तु ध्यात्वा च
मनसा सुधीः॥ प्रासादं पूजयेत्सम्यग्गंधपुष्पादिभिः शुभैः॥ सूत्रेण वेष्टये देवं वासस्त
त्परिकल्पयेत्॥ प्रासादमेवमभ्यर्च्य वाहनं चाग्रमंडपे॥ ततस्तत्रैव यस्य देवस्य
स्यां दिश्यायतनं तच्च वाहनपूजनं विदध्यात्॥ तद्यथा॥ इंद्रांबिका विष्णूनामैंद्र्यां
अग्नेराग्नेय्यां। रुद्राणां मातॄणां गणानां यमस्य च याम्यां॥ ~~वायुदुर्गाफणींद्रराजस्था~~

नद्कालिपितॄणां नैरृत्यानां नैरृत्यां॥ वरुणांभोधिसरितां प्रतीच्यां। वायुदुर्गाफणींद्रराज-
स्थानां मारुत्यां॥ यक्षोमास्कंदसोमानां सौम्यां। शिवस्येशान्यां॥ द्वारस्य दक्षिणे वामे च
माहेश्वरश्रियो। मध्ये दिक्पत्नगर्भस्य सर्वजं तु सुखावहमिति॥ गर्भगृहं पुनः प्रा
प्य निस्तारविधिनार्चयेत्। यस्य सिंहासने युक्ता या आवृतास्तथोरगाः॥ रूपयोलोक
पालाश्च देवं स्कंदस्तथा वृषः॥ प्रियागुणामातरश्च सोमो विष्णुः पितामहः॥ नागाय
क्षाश्च गंधर्वा यथैव दिव्यान्तस्थराः॥ त्र्यंबकं त्र्यक्षं प्रशानं शिवं रुद्रमुमापतिं॥ आ
वाहयामि सगणं सपत्नीकं वृषध्वजमिति॥ आगच्छ भगवन् रुद्रानुग्रहाय शिवो भ
व॥ शाश्वतो भव पूजां मे गृहाण त्वं नमो नमः॥ ॐ स्वागतमनुस्वागतं भगवते यं च
पादासनं प्रकल्पितं निहितं नमो नमः॥ स्वागच्छेत्यादिको मंत्रः रुद्रसोमपदस्थाने दृ
ष्टीन विष्णुलक्ष्म्यादिपदोपेलाः सर्वदेवस्य धारणा॥ ततः पंचामृतेन तत्तन्मंत्रैः स्ना

संस्नाप्य तु विधीः। प्रतिमोदधमिति। पुष्पोदकेन गंधधारामिति। गंधोदकेन शांतिकलशोद
केन संस्नाप्येच्छ्वेष्टोत्तरसहस्राष्टोत्तरशतान्तदर्वत दर्दसंख्येस्ती चोदकलशे इमं मे गंगे इति
नदीरा वा यमहात्निषिंचेत्॥ इमा आपः देवस्य त्वा समुद्रज्येष्ठाः॥ आपो हिष्ठा रुद्राध्यायेन
कादशावृत्तेन सहस्रशीर्षेत्यस्तु पुरुषसूक्तेनेति॥ ततो गंधाद्युपचारैः पूजयित्वा देवं ध्याये-
त्॥ यज्ञायतो दूरमुदैति॥ पुरुषसूक्तं॥ अजित्वाक्षरनो नुमः। नत्वा वा चान्यदर्तितां त
तो लिंगं प्रार्थयेत्। भगवन् देवदेवेश धर्मकर्मार्थमोक्षद॥ विद्याविद्येश्वरे रुद्रे गणेशैः
लोकपालकैः॥ देवदानवगंधर्वैर्यक्षसिद्धकिंनरैः सह। अस्मिन् लिंगे महादेव सर्वदावस
न्नः प्रसन्नो॥ पुंसामनुग्रहार्थाय। पृथिव्यां स्वेच्छया प्रभो॥ परावरेण त्वा येन स्थातव्यं स
र्वदा त्वया॥ सर्वविघ्नहरः पुंसां सर्वदुःखहरः सदा॥ सर्वदा यजमानस्येच्छासंपत्करो भ
व॥ नमस्ते सर्वधर्माय संतोषविहितात्मने॥ ज्ञानविज्ञानरूपाय ब्रह्मस्तेजोनिधिर्जिने

नमस्तेऽस्तु शुद्धदेहाय पुरुषाय महात्मने॥ मूर्तिपानां स्थापकस्य शिल्पिनां च विभो सदा
॥ ग्रामदेशान् नृपाणां च शांतिं कुरु विभो सर्वदा॥ याजकाराधकानां च तत्रस्थानां च वत्सल॥
सर्वेषां च जगन्नाथ यदिच्छासिद्धिप्रदो भव॥ चंद्रार्कावनिपर्यंतं लिंगेस्मिन्परमेश्वर॥ स्था
तव्यं मया सार्धं सर्वलोकानुकंपया॥ यावच्चंद्रश्च सूर्यश्च यावत्तिष्ठंति मेदिनी॥ ता
वत्त्वयात्र देवेश स्थातव्यं स्वेच्छया प्रभो॥ ततः क्षमाप्य प्रार्थयेत्। शिवेतु॥ ज्ञानतोऽज्ञा
नतो वापि भगवन् यत्कृतं मया॥ तत्सर्वं पूर्णमेवास्तु त्वत्प्रसादान्महेश्वर॥ वि
ष्णोस्तु॥ ज्ञानतोऽज्ञानतो वापि यावान्विधिरनुष्ठितः॥ स सर्वस्त्वत्प्रसादेन समग्रोस्तु भ
वता मम॥ ज्ञानतोऽज्ञानतो वापि शास्त्रोक्तं न कृतं हि [illegible] यत्। तत्सर्वं पूर्णमेवास्तु त्व
त्प्रसादादधोक्षज॥ अथ कर्तृनाम युक्तं देवस्य नाम कथयति॥ नारायणस्यामुकस्वा
मि अमुकनारायणो वा॥ शिवस्यामुकेश्वरः। भानोरमुकादित्यः। देव्या नाम अमुके

श्वरी। गणपतेरमुकविनायक इति। अत्रैव विकल्पांतरमप्यमाने देवे अपशकुनैस्यानेवक्रे
भ्रांते स्फुटिते वा प्रायश्चित्तमुक्तं॥ ततो यजमानः पत्नीपुत्रान्वितो होमोत्सर्गं कृत्वा प्रासा
दोत्सर्गं कुर्यात्। तिष्ठादिसंकीर्त्य पक्वेष्टकपाषाणकाष्ठमृण्मयादिनिर्मितममुं प्रासादं वि
ष्णुशिवब्रह्मादिरूपस्य हस्तुत्सृजे इति॥ अत्रैव करिष्यमाणेनेस कपूजोपकरणानि ताम्रकलश
। सावारकंख। धूपदीपनैवेद्यपात्र। पुष्पकरंडक। तांबूलकरंडक। शय्यातूलीकोपधा
न घंटा छत्रचामरव्यजनपरिधानवस्त्रालंकारवितानादर्शादि देवो हेशेनोत्सृजेत
। अथ प्रासादे महाध्वजारोप॥ स च प्रासादसमस्तदैर्घ्यतदर्धं वा दैर्घ्ये षोडश राशा गेनतद
र्धेन तदर्धेन वा विस्तृतो मूले। ध्वजदंडस्तु चतुर्दशहस्तो न वहस्तो वा। स च देवेन सह वा
धिवासनीयः गंधाद्यैः पूजयित्वा प्रासादस्योपमानो यत्र प्रचेरो वं पापसुपतं मस्तूंभा
त्वा विन्यसेत्। सर्पकोटिसहस्राणि प्रलयं वुद्धिनिःसृत। प्रशस्तदशनमा मंशा कामो मुख

त्रातो हृत्वा यात्मादत्रमेयाद्वाणवात॥३४ धृतोत्र वतानाथ इयशितस्त्वं क्षमस्व मे
इति॥ गच्छ गच्छ सुरश्रेष्ठ स्वस्थानं विसृज्य अस्मारपि हृदये इति मंडपदेवता विसृज्यया
गमंडपादि सामग्रीमाचार्याय स्नानपंडपसामग्रीं शिल्पिने प्रतिपादयेत। ततो ब्रा
ह्मणभोजनं। सहस्रमर्धं तदर्धं वा शतमर्धं तदर्धं वेति। अंते यजमानेन कृतं कर्म
णः संपूर्णतां वाचयित्वा। यस्य स्मृत्या च आचार्य ऋत्विग्भिः सह प्रमादात्कुर्वतां क
र्मेति पठित्वा कृतं कर्मेश्वरार्पणं कृत्वा आचार्यर्त्विग्भिः सह जलक्रीडां कृत्वा। स्व
गृहं गत्वा। अनाथादीन्भोजयेत्। स्वयं च सुहृद्युतो मिष्टान्नं भुंजीतेति॥ ध्वजारो
पणप्रासादलिंगप्रतिष्ठाफलं तु॥ यावंतस्तंतवस्तस्य ध्वजस्य वरवर्णिनि॥ तावद्व
र्षसहस्राणि कर्त्ता स्वर्गे महीयते। यावत्पदानि कुरुते ध्वजेप्राणो प्रदक्षिणं॥ ताव
द्वर्षसहस्राणि कर्त्ता भोगभुजः फलं॥ यथा विधूयते वातेरजः प्रासादमस्तके॥ तथा क

कंद्रं । अष्टांतएछता जिकं मदा मश्मश्रु मूर्द्धजं ॥ सर्पोपवीतं शूलासी शक्तिपुष्कर धारि
णं ॥ चतुर्भुजं चतुर्वक्त्रं स्फुरच्चेडार्कशेखरं ॥ दिवदानवदैत्यानां दर्पितानां विनाशनमिति
॥ ततो ध्वजादेवता लिंगसूचनाय विष्णोर्ध्वजे गरुत्मंतं ॥ शिवस्य वृषभं ॥ ब्रह्मणो
हंसं ॥ सूर्यस्य धर्मं ॥ दुर्गायाः सिंहं ॥ गौर्याः गोधां ॥ गणेशस्य मुषकं कयोर्मृगी ॥ स
र स्वसाहं समिति ॥ यस्य यस्य यद्वाहनं । तत्तद्वर्णं राजतं वा तस्य तस्य ध्वजे ॥ धीवास्य
संपूज्य बंधनीयं ॥ अथ तं ध्वजं प्रासादपृष्ठदेशे नैर्ऋतभागे मारुते वैशाने वा शिखरस्य
प्रासादपंचमांशेन चतुर्थेन तृतीयेन वा ध्वजस्तंभं धारं कृत्वा तत्रारोपयित्वानुमंत्रयेद
तैः शांतिरस्तु शिवं चास्तु स्थानस्यास्य शुभं तथा ॥ प्राणिनः सुखिनः संतु राजा च वि
जयी भवेत् ॥ यावच्चंद्रश्च सूर्यश्च तावदत्र स्थिरो भव । अद्य मे सफलं जन्म अद्य मे
जननो स्थितिः अद्य मे परमं पदं ॥ मोचितोहं त्वया नाथ दुःखौघाद्भवबंधनात् ॥ सं

अद्यमे सफलं धनं ॥

त्र्यसि जेत्यापं सप्तजन्मार्जितं क्षणात् ॥ यत्रैव क्रियते राष्ट्रे ध्वजयष्टिनिवे
शनं ॥ नाकालमृत्युस्तत्रास्ति नालक्ष्मी पापसंघदि ॥ नोपसर्गभयं तत्र ना
पि रोगो न विभ्रमः ॥ सकालवर्षपर्जन्यः सुभिक्षं विजयं नृप ॥ एतानि स
र्वभूतानि पयस्विन्यः पयोन्नताः ॥ कृतघ्नो ब्रह्महा गोघ्नो दृष्ट्वा ध्वजनि
वेशनं ॥ प्राप्नोति पापनिर्मोक्षं किमु कर्तुः फलं वयं ॥ प्रतिमालिंगवेदानां
पावतः ॥ तावद्वर्षसहस्राणि कर्त्ता सोश्नुते फलं ॥ कृते महाध्वजारोहे
तत्रापि चलितश्च ये ॥ शिल्पिनो नायको भृत्यास्तत्रिताजोपि धारयेत ॥ एषां
मृतानां वर्षाणि यांति योगशिवालये ॥ दृष्ट्वा क्षणमपि दारुणे तेपि रुद्रा
नसंज्ञयः ॥ ॥ इति श्रीनारायणभट्टसुतशंकरोन्नीते धर्मवैतनिर्णये
प्रासादशिवोत्सचरप्रतिष्ठापद्धतिः समाप्तः ॥ ॥ श्रीरस्तु ॥ ७

१०